# Abhishtaprarthanashtakam

# અભીષ્ટપ્રાર્થનાષ્ટકમ્

## Document Information

Text title : abhIShTaprArthanAShTakam

File name : abhIShTaprArthanAShTakam.itx

Category : devii, rAdhA, raghunAthadAsagosvAmin, stavAvalI, aShTaka, devI

Location : doc_devii

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# અભીષ્ટપ્રાર્થનાષ્ટકમ્

કદા ગોષ્ઠે ગોષ્ઠક્ષિતિપગૃહદેવ્યા કિલ તયા
    સબાષ્પં કુર્વત્યા વિલસતિ સુતે લાલનવિધિમ્ ।
મુહુર્દૃષ્ટં રોહિણ્યપીહિતનિવેશામવનતં
    નિષેવે તામ્બૂલૈરહમપિ વિશાખાપ્રિયસખીમ્ ॥ ૧॥

કદા ગાન્ધર્વાયાં શુચિ વિરચયન્ત્યાં હરિકૃતે
    મુદા હારાન્વૃન્દૈઃ સહ સવયસામાત્મસદને ।
વિચિત્ય શ્રીહસ્તે મણિમિહ મુહુઃ સમ્પુટચયા-
    દહો વિન્યસ્યન્તી સફલયતિ સેયં ભુજલતામ્ ॥ ૨॥

કદા લીલારાજ્યે વ્રજવિપિનરૂપે વિજયિની
    નિજં ભાગ્યં સાક્ષાદિહ વિદધતી વલ્લભતયા ।
સમન્તાદ્ક્રીડન્તી પિકમધુપમુખ્યાભિરભિતઃ
    પ્રજાભિઃ સઞ્જુષ્ટા પ્રમદયતિ સા માં મદધિપા ॥ ૩॥

કદા કૃષ્ણાતીરે ત્રિચતુરસખીભિઃ સમમહો
    પ્રસૂનાં ગુમ્ફન્તીં રવિસખસુતામાનતતયા ।
સમેત્ય પ્રચ્છન્નં સપદિ પરિરિપ્સોર્બકરિપો-
    ર્નિષેધે ભ્રૂભઙ્ગં ભૃશમનુભજેઽહમ્ વ્યજનિની ॥ ૪॥

કદા શુભ્રે તસ્મિન્પુલિનવલયે રાસમહસા
    સુવર્ણાઙ્ગીસઙ્ઘેષ્ટહમહમિકામત્તમતિષુ ।
હરૌ યાતે નીલોત્પલનિકસતાં જિત્વરગુણા-
    દ્ગુણાદસ્માન્દિવ્યદ્રવિણમિવ રાધા મદયતિ ॥ ૫॥

કદા ભાણ્ડીરસ્ય પ્રથિતરુચિરોત્સઙ્ગનિલયે
    વરામધ્યાસીનં કુસુમમયતૂલીમતુલિતમ્ ।
પ્રિયે ચિત્રં પત્રં લિખતિ નિહિતસ્વઙ્ગલતિકાં
    વિશાખાપ્રાણાલીં ભજતિ દિશતી વર્ણકમસૌ ॥ ૬॥

કદા તુઙ્ગે તુઙ્ગે રહસિ ગિરિશૃઙ્ગે વ્રતતિજા-
    ન્પ્રિયે પૂર્વા લીલા નિગમયતિ સંસ્તવ્ય નિલયાન્ ।
મદેનાવિષ્પષ્ટં સકલિતપદં વ્રીડિતતયા
    દ્રુતમૌત્ક્યેનૈષા વિરચયતિ પૃચ્છાં મમ પુરઃ ॥ ૭॥

ગતિર્યન્મે નિત્યા યદખિલમપિ સ્વં સવયસામ્
    મદીશ્વર્યાઃ પ્રેષ્ઠપ્રણયકૃતસૌભાગ્યવરિમા ।
હરેર્યત્પ્રેમશ્રીર્નિવસતિરમુષ્યસ્તુલનયા
    સદા તસ્મિન્કુણ્ડે લસતુ લલિતાલી મમ દૃશી ॥ ૮॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        અભીષ્ટપ્રાર્થનાષ્ટકં સમ્પૂર્ણમ્ ।

*Abhishtaprarthanashtakam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*